विनिहतो राजन् एको बहुभिराहवे” भा॰द्रो॰प॰ ॥

**अभिमर** पु॰ आभिमुख्येन म्रियतेऽत्र अभि+मृ-आधारे अप्। १युद्धे। करणे अप्। २भये, अभिम्रियते यस्मात् अपादाने अप्। ३ मारणव्यापारे बधे ४ बन्धने च अभिमुखी-भूय म्रियते कर्त्तरि अच्। ५ स्वसैन्ये ६ धनाशया प्राणनिरपेक्षतया हस्तिनं व्याघ्रं वाऽभियोद्धुमुद्यते च।

**अभिमर्द्द** पु॰ अभि+मृद-भावे घञ्। १चूर्णीकरणे २निष्पी-ड़ने च। आधारे घञ्। ३ युद्धे, ४ मद्ये च। कर्त्तरि अच्। ५ मर्द्दनकर्त्तरि त्रि॰।

**अभिमर्द्दन** न॰ अभि+मृद-भावे ल्युट्। १ आरम्भकसं-योगनाशनेन चूर्णीकरणे २निष्पीड़ने च।

**अभिमर्श(र्ष)** पु॰ अभि+मृश(ष) भावे घञ्। १ स्पर्शे धर्षणे च “पराभिमर्शेन तवास्ति कः करमिति” कुमा॰। “कृताभिमर्शा(र्षा)मनुमन्यमानः सुतां त्वया नाम मुनि-र्विमान्य” शकु॰। “परदाराभिमर्शे(र्षे)षु प्रवृत्तान् नृन् महीपतिः” मनुः।

**अभिमर्श(र्ष)क** त्रि॰ अभि+मृश(ष) ण्वुल्। १स्पर्शकर्त्तरि २धर्षणकर्त्तरि च “न दुष्टः कश्चिदप्यासीत् परदाराभि-मर्शकः” रामा॰।

**अभिमर्शन(र्षण)** न॰ अभि+मृश(ष)-भावे ल्युट्। १ स्पर्शे “नीवीस्तनप्रावरणसक्थिकेशाभिमर्शनम् (र्षणम्)” या॰। “यः पुनः परनारीपरिधानग्रन्थिप्रदेशकुचप्रावरणजघन-मूर्द्धकचादिस्पर्शनं साभिलाष इवाचरति” मिता॰। “सद्यो-ऽभिमर्शनम्(र्षणम्) कात्या॰ ९,८,१९, “तूष्णीं पिन्वना-दीनां करणाभिमर्शन(र्षण)स्तवनधूपनप्रदहनोद्वरणाव-सेचनानि” कात्या॰ २६,१,२७ धर्षणे च “परदाराभि-म(र्शे)र्षणम्” स्मृतिः।

**अभिमाति** त्रि॰ अभि-मेङ् कर्त्तरि क्तिन् न इत्त्वम्। घातके। “विष्णोः क्रमोऽस्यभिमातिहा” यजु॰ १२,५, “अभिमातिः घातकः” वेददी॰। २शत्रौ पु॰ हेम॰। “अग्ने! सहस्व पृतना अभिमातीरपास्य” य॰ ९,३७, अभिमातिः शत्रु-रुच्यते स्त्रीत्वमार्षम् अभिमातीन् शत्रून्” वेददी॰।

**अभिमातिन्** पु॰ अभिमातमनेन अभि+मेङ-भावे क्त वेदे पृ॰ न इत्त्वम् इष्टा॰ इन्। शत्रौ। “बाधते विश्वमभिमातिनम्” ऋ॰ १,८५,३ “अभिमातिनम् शत्रुम्” भा॰।

**अभिमातिषाह्** त्रि॰ अभिमातिं रिपुं सहते सह-ण्वि-वेदे षत्वम्। रिपुजयिनि “तद्वीरासो अभिमातिषाहः” ऋ॰ ६,७,३, “अभिमातिषाहः शत्रूणामभिभवितारः” भा॰

**अभिमातिषाह** त्रि॰ अभिमातिं रिपुं सहते सह-अण् उप॰स॰ वेदे षत्वम्। रिपुजयिनि। “अभिमाति-षाहोगवेषणः सहमान उद्भित्” अथ॰५,२०,११।

**अभिमान** पु॰ अभि+मन-घञ्। १ आत्मन्युत्कर्षारोपे, २ मिथ्यागर्व्वे-बलादिदर्पे, ३ प्रणये, ४ हिंसायाम्। ५गर्वमात्रे “संकल्पयोनेरभिमानभूतम्” कुमा॰ ६स्वरूप-ज्ञाने। “अनात्तस्य चाभिमानसामर्थ्यात्” कात्या॰ ९,५,१२ “अनात्तस्य अनात्तरसस्य सरसस्यैव सोमस्य सोमाभि-मानसामर्थ्यात् सोमबुद्धिसामर्थ्यादिति सोमोयमिति बुद्धि-रनात्तरसे अनभिषुते एव सोमे नाभिषुते” कर्क॰। ७मिथ्याज्ञाने “अभिमानैर्न मानोमे जातिदोषेण वै महान्” भा॰ शा॰प॰। उत्साहादिसमुद्बोधः साधारण्याभि-मानतः” सा॰द॰। मिथ्याज्ञानञ्च तदभाववति तत्-प्रकारकं ज्ञानं यथा देहे आत्मत्वबुद्धिः आत्मनि च असतो-ऽप्युत्कर्षस्य ज्ञानम्। शुक्तिकायां रजतज्ञानम् मूर्खस्य पा-ण्डित्याभिमान इत्यादि। अभिमानस्यात्मधर्म इति वैशेषिका-दयः। अन्तःकरणधर्म्म इति पातञ्जलादयो वेदान्तिनश्च। तत्र विपर्य्यासज्ञानमविद्या सा च बुद्धिधर्मः गर्वात्मकज्ञानम् अहङ्कारस्य वृत्तिभेदः। अहङ्कारश्चाभिमानवृत्तिकमन्तः-करणद्रव्यम्” सां॰प्र॰भा॰। अभिमानोऽहङ्कारः सा॰सू॰ “अभिमामोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः” सा॰का॰ अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधि-कृतः शक्तः खल्वहमत्र, मदर्था एवामी विषयाः, मत्तो-नान्योऽत्राधिकृतः कश्चिदस्त्यतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धि-रध्यवस्यति कर्त्तव्यमेतन्मयेति” त॰कौ॰। अन्तः-करणञ्च वृत्तिभेदात् त्रिविधमिति साङ्ख्यादयः” “मनो-बुद्धिरहङ्कारश्चित्त करणमान्तरम्। संशयो निश्चयोगर्वः स्मरणम् विषया इमे” इति चतुर्विधवृत्तिमत्त्वेन चतुर्विधं वेदान्तिनः स्वीचक्रुः। “न हि धनिनो गृहस्थस्य धनाभि-मानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न हि कुण्डलिनः कुण्डलित्वाभि-माननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानहीनस्य तदेव कुण्डलित्वनिमित्तं सुखं भवति” शा॰भा॰। अभितोमानः। शृङ्गाररसावस्था-भेदे। “विप्रलम्भोऽथ सम्भोग इत्येष द्विविधोमतः स